International Journal of Sanskrit Research 2019; 5(5): 79-82

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(5): 79-82
© 2019 IJSR
www.anantaajournal.com
Received: 16-07-2019
Accepted: 20-08-2019

**करि पुरुषोत्तमाचार्युलु**
सहाचार्यः, कृष्णयजुर्वेदविभागः
श्री वेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपति, आँध्र प्रदेश, भारत

# वेदादेवहि विज्ञानम्

**करि पुरुषोत्तमाचार्युलु**

## प्रस्तावना

निखिलजगन्निदानभूतस्य परमात्मनः उछ्वासनिश्वासभूताः वेदाः। वेदाः भगवता जगते प्रदत्तं आदिमं विज्ञानम्। वेदाः प्राणिकोटेः अपरिमिताः अक्षयसम्पदः। निगमाः विशालस्यास्य भूमण्डलस्य, विशिष्य भारतपृथिव्याः दिव्याभरणायमाणानि। महत्यस्मिन् भूप्रपञ्चे अद्यावधि भारतीयाः स्ववैशिष्ट्यं उच्चैस्वरेण घोषयन्तीत्यत्र अक्षरनिबद्धवेदरूप आभरणराशिरेव कारणम्। विषमायां अज्ञानरजन्यां चरन्त्याः समस्तमनुजावलेः अनुसरणीय, अत्युत्तम, परमपावन-पथप्रदर्शकाः निगमाख्य करदीपिकाः वेदाः। अत्र रजनीचरत्वं नाम ? विवेकहीनप्राणिनामिव केवलभुक्त्यर्थमात्रजीवनमिति विज्ञेयम्। तादृक् तमः अपनीय उत्तमस्य धर्मिकजीवनस्य उपदेष्टृणि छन्दोयोतींषि। जन्मप्रभृति ऐहिकसुखम्पादनाय, देहपातानन्तरं उत्तमलोक प्राप्तयेच अपेक्षित धर्माधर्म विवेकसौन्दर्यप्रदायकविज्ञानघनमणिः वेदः। अज्ञानिनं मनुष्यं सुज्ञानिनं करोति वेदराशिः। विशालप्रकृतौ भौतिकदृष्ट्या मनुष्यंविना सर्वाऽपि प्राणिकोटिः यद्यपि प्रबला तथापि ज्ञानबलिनः मनुष्यस्य अग्रनेतृत्व सामर्थ्यसम्पादकोवेद एव। तादृशवेदराशिं ज्ञातवातां अस्मत्पूर्वाचार्याणां अनुभव एव अस्माकं जीवनपन्थानं देदीप्यमानं करोति। मनुष्यस्य धर्मार्थकाममोक्षाख्य-चतुर्विधपुरुषार्थाः अत्यन्तावश्यकाः भवन्ति। तैरेव उत्तमागतिः सिध्यति। सा च उत्तमागतिः मानवेतरप्राणिनः विवेकहीनत्वात् दुस्साध्यैव। यादि वेदो नास्ति तर्हि मनुष्यस्यापि तथैव। यतः वेदेतरस्य कस्यापि तादृशी शक्तिर्नास्ति। कथं वेदस्य तादृशी शक्तिः ? कुतः ? नाम वेदस्य भगवतः सामीप्यं वर्तते। यथा भगवान् अनादिः तथैव वेदः अपि अनादिः। न केवलं तावता अपिच परमात्मनः इव वेदः नित्यः अविच्छिन्नश्च। वेदः केनापि न रचितः अत एव तस्य अपौरुषेयः इत्याख्या। प्रत्यक्षेणवा अनुमानेन वा प्रमातुं यः उपायः नशक्यते वेदः तम् उपायं बोधयति। अतः एवोक्तं सायणाचार्यैः -

Correspondence
**करि पुरुषोत्तमाचार्युलु**
सहाचार्यः, कृष्णयजुर्वेदविभागः
श्री वेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपति, आँध्र प्रदेश, भारत

"प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता"।।[1] इति

वेदवेद्यः परमेश्वरः आदौ वेदान् चतुर्मुखब्रह्मणे उपदिदेश। वेदानां सहायेनैव ब्रह्मा चित्रातिशयां जगत्सृष्टिं चकर।

"नामरूपञ्च भूतानां कृत्यानाञ्च प्रपञ्चनम्।
वेदशब्दे एवादौ देवादीनाञ्चकारसः"[2]।।

"आदौ वेदाः प्रमाणम्" इत्यादिवचनान्यत्र प्रमाणानि भवन्ति। अनेन पिपीलिकादि ब्रह्मपर्यन्तं प्रपञ्चोत्पत्तौ वेदएव आधारभूतोभवतीति ज्ञातव्यम्। अपिच "परमो वेद्यते येन स वेदो वेद उच्यते" इत्युक्तरीत्या अन्याः विद्याः वेदानाम् इव ज्ञानप्रदाः न भवेयुः। विद् ज्ञाने इत्यस्मात् धातोः वेदशब्दः निष्पन्नः। वेदो नाम वेद्यः, ज्ञेयः इत्यर्थः। एवं बहुविलक्षणो वेदः पूर्वं एकराशिरूपेण अवर्तत। अस्मत्प्राचीनाचार्याः व्यसादयः तपसा वेदं शुश्रुवुः। अत एव तस्य "श्रुतिः" इति नाम सम्पन्नम्। गच्छताकालेन मनुष्याणां बुद्धिः दुर्बलतां प्राप्स्यतीति कारणेन भाविकाल अध्येतृणां सौकर्याय महर्षिः पाराशरः वेदराशिं चतुर्धा व्यभजत्। तथा विभक्ताः शाखाः एकत्रिंशदुत्तर एकादशशतं शाखाः अवर्तन्त। तासु ऋग्वेदे एकविंशतिशाखाः, यजुर्वेदे षडशीतिशाखाः, सामवेदे सहस्त्रशाखाः शुक्लयजुर्वेदे पञ्चदशशाखाः, अथर्ववेदे नवशाखाः व्यराजन्त। अनध्ययनाद्वा, अलाभाद्वा सर्वाः अपि शाखाः लुप्तप्रायाः दृश्यन्ते। अधुना सर्वस्मिन् भारते द्वादशशाखाः एव लभ्यन्ते। तासु ऋग्वेदे द्वे शाखे, यजुर्वेदे चतस्त्रः शाखाः, सामवेदे चतस्त्रः शाखाः, अथर्ववेदे द्वे शाखे लभ्यन्ते। एतास्वपि काश्चन शाखाः क्षीणदशायां सन्ति। तत्र ऋग्वेदः पादव्यवस्थया, पद्यरूपेणच भाति। यजुर्वेदः गद्यात्मकः, "गीतिषु सामाख्या"[3] इति गीतिकारूपः सामवेदः, अथर्ववेदः यज्ञादिदेवतान् सूचयति। चतुर्णां वेदानाम् उपवेदाश्च भवन्ति। आयुर्वेदः ऋग्वेदस्य, धनुर्वेदः यजुर्वेदस्य, गन्धर्ववेदः सामवेदस्य, शस्त्रास्त्राणि अथर्ववेदस्य उपवेदाः। अद्यत्वे अस्माकं संघे बहवो जनाः वेदोक्त विषयाः अस्मत्सम्बन्धिनः नभवन्तीति, सर्वेषां जनानां हिताय न भवन्ति इति मन्यते। अस्मिन् विषये सर्वस्य जगतः मार्गदर्शकानां वेदानां निवासस्थाने भारतदेशे केचन वेदविश्वासहीनाः अपि सहकुर्वन्ति। किन्तु वेदोक्त विषयाः सर्वेपि समाजश्रेयसे एव भवन्ति। प्रपञ्चस्य नेत्रोन्मीलनात् प्रागेव वेदात् भारतीयाः तदपेक्षित विद्या, वैद्य, ओषध, निर्माण, अन्नकर्षणादीनि ज्ञातवन्तः। अत एव वेदे तेषां तादृशः आदरः आसीत्। सम्प्रति अस्माभिः अनुभूयमाणानां नैकेषां व्याधीनां निवारणाय नैकान् उपयान् वेदः बोधयति। नकेवलं व्याधीनां, किन्तु आधीनाञ्च। वेदबोधित जपहोमदानव्रतानां अनुष्ठानेन इष्टप्राप्तिः अनिष्टपरिहारश्च सर्वैरप्यास्तिकजनैः अनुभूयते। अस्माभिः अनुभूयमाणानां बहूनां दुःखानां हेतवः पापकर्माणि भवन्ति। "यस्सकृत्पापकं कुर्यात् कुर्यादेनस्ततोबलम्" इति ऐतरेयब्राह्मणं ब्रवीति। सकृत्पापं कृतवता मनुष्येण तदपेक्षया बहूनि पापकर्माणि क्रियन्ते। पाञ्चभौतिकशरीरिणां मानवानां अरिषड्वर्गैः वशीकृतत्वात् पापकर्मतावत् स्वाभाविकमेव। तथापि वेदः मनुष्यं पापकर्मणः दूरीकरोति। यद्यपि अस्मासु अनेके जनाः वेदोक्तजपहोमादिकर्माणि समनुष्ठायापि तत्कर्मफलं नप्राप्नुवन्तीत्यत्र कर्मलोपः एकं कारणं भवति, अथवा पुनःपापकृत्यमपि एकं कारणं भवितुमर्हति। अधर्मकर्मण्यनासक्तस्सन् विधिवत्कर्म अनुतिष्ठति चेत् अवश्यं तत् कर्म फलप्रदमेव भवति। वेदेषु नैके विषयाः आश्चर्यजनकाः दृश्यन्ते। मण्डूकघोषेण वृष्टिः जायते इति लोकव्यवहारः वर्तते। इदं सत्यमेवेति ज्ञायते। अस्य वचनस्य प्रमाणभूतो मन्त्रः अथर्ववेदे वर्तते । "खण्वखा३इ खैमखा३इ मध्ये तदुरि। वर्षं वनुध्वं पितरो मरुतां मन इच्छत"[4] इति। अस्मिन् मन्त्रे मण्डूकाः प्राथ्र्यन्ते। खण्वखा, खैमखा तदुरि इति स्त्रीजाति मण्डूकानां नामानि भवन्ति। एभिः नामभिः ताः आहूय हे मण्डूकाः युष्मत्कण्ठरवेण मरुद्गणान् वशीकृत्य यूयं वृष्टिकारकाः भवत इति। मण्डूकध्वनेः वृष्ट्याश्च सम्बन्धः अस्तीति ज्ञायते। इमं श्रुतिप्रोक्तविषयमेव लोकाचारे वयं

पश्यामः। एवञ्च प्राणघातुकानां व्याधीनाम् उपशमनार्थं अथर्ववेदः महदाश्चर्यकरम् उपायं बोधयति "अनुसूर्यमुदयताम्" इति मन्त्रेण अभिमन्त्रिते जले रक्तवर्णधेनोः केशान् सम्मिश्र्य पिबेत्। तेन हृद्गतव्याधयः शान्ताः भवन्तीति ज्ञायते। किञ्च, कामिलरोगापनुत्तये (जाण्डिस) अथर्ववेदः चित्रां चिकित्साम् दर्शयति। छुल्लिकायां घटमेकं निधाय तस्योपरि अन्यम् एकं घटं संस्थाप्य उभयोर्घटयोः हरिद्रामिश्रितमन्नं पक्त्वा घटद्वयस्थम् अन्नम् एकीकृत्य रुग्णस्य शरीरे आपादचूडमुपलिप्य तं रुग्णं शय्यायाम् उपवेश्य शय्यायाः पादे हरितवर्णसूत्रेण शुकस्य वामपादं बध्वा रुग्णं स्नापयेत्। अथवा "शंखुछिदम्" इति किंचित् भस्म वर्तते। अग्नौ तद्भस्मं सन्दह्य तद्भस्ममिश्रितजलेन ब्रह्ममुहूर्ते रोगी स्नायात्। एवं कृते सति कामिलरोगः विनश्यतीत्यवगम्यते। तथाच अरण्यतिलकाष्ठतप्तजलेन गृहे, अटव्यांवा स्नात्वा आचामेत्। अनेन अतिश्रृङ्गारजनितव्याधयः निवर्यन्ते। लोके कृष्णमृगचर्म आसनरूपेण, एवं कृष्णाजिनसंज्ञया वैदिककर्मसु च उपयुज्यते। कृष्णमृगशरीरं ओषधमयमिति, विशिष्य मृगचर्म, श्रृङ्गाणि शफाः वीर्यस्तम्भन, पाण्डु, यक्ष्म, कुष्ठादि आनुवंशिकव्याधिभ्यः रक्षन्ति। अयमपि विषयः अथर्ववेदे कौमारीशान्तिप्रकरणे विस्पष्टं दृश्यते। अस्माकं गृहेषु नित्यं स्त्रियः, केषुचन वैदिकर्मसु पुरुषाश्च नेत्रयोः अञ्जनं धरन्तीति विदितः विषयः। तेन किं प्रयोजनमिति चेत् उत्तरमथर्ववेदे लभ्यते। "एहि जीवमित्यांजनमणिं बध्नाति" इति कौशिकगृह्यसूत्रम्। "एहि जीवं त्रायमाणं पर्वतस्यास्यक्ष्यम्। विश्वेभिर्देवैर्दत्तं परिधिर्जीवनाय कम्"[5] इति मन्त्रः अञ्जनधारणे विनियुज्यते। अनेन मन्त्रेण अञ्जनमेवं प्रार्थ्यते - " हे अञ्जन ! प्राणधारिणः यजमानस्य रक्षणाय त्वमागच्छ। त्वं त्रिककुत्पर्वस्य चक्षुरिन्द्रियमसि। आरोग्येण चिरंजीवनाय इन्द्रादिभिर्देवैः त्वमस्मभ्यं दत्तमसि। नगरस्य परितः निर्मितानि प्राकाराणि शत्रून् यथा रुन्धन्ति तथा नेत्रसम्बन्धव्याधिरूपात् मृत्योः अस्मान् त्रायस्व इति। नाम होमेन सन्तुष्टः वायुः वृष्टिं वर्षयतीति अनयाश्रूत्या ज्ञायते। एवं वेदविहितकर्मणः अनुष्ठानेन वृष्ट्युत्पत्तिः निरूपिता। इदानीन्तनकर्षकाः सद्यः फलैषिणः वृषभैर्विना तेषां स्थाने यन्त्रान् विनियुज्य व्यवसायं कुर्वन्ति। किन्तु वृषभैरेव कर्षणे किञ्चित् विशेषम् ऊहातीतञ्च फलं जायते इति श्रुतिः बोधयति। "पद्भिः सेदिमक्रामन्निराञ्जङ्घाभिरुत्खिदन्। क्रमेणानड्वान् कीलालं कीनाशस्याभिगच्छतः" इति अथर्ववेदे अनडुत्प्रकारणे विषयोयं दृश्यते। अस्यायमाशयः - ब्रह्मा वृषभशरीरं प्रविश्य तस्मै वृषभाय सकलविधसामर्थ्यं ददातीति, अतः ब्रह्मस्वरूपः वृषभः श्रमं विनैव भूमिं कर्षति अभीप्सितस्थायिनि सस्यानि सम्पादयति। वृषभबद्धलाङ्गलेन कर्षणे उग्रव्याधयः एवं चक्षूरोगाश्च नश्यन्तीति ज्ञायते। "नमस्ते लाङ्गलेभ्यो नम ईषायुगेभ्यः"[6] इति आथर्वणिकेन मन्त्रेण उदकुम्भमभिमन्त्र्य रुग्णं वृषभबद्धलाङ्गलस्य अधः उपवेश्य तन्मन्त्रजलेन स्नापिते सति यक्ष्मादयो व्याधयः नश्यन्तीत्यवगम्यते। एवमेव नेत्रसामर्थ्यं सम्पादनाय "आग्नावैष्णवेष्टि" नामकं कर्म कुर्यादिति श्रुतिर्वेदयति। अस्मिन् कर्मणि वृषभकृष्टभूमौ निष्पन्नान् तण्डुलान् आज्येन सह पक्त्वा तेन चरुणा अग्नाविष्णुभ्यां जुहुयात्। अनेन कर्मोणा धेनोः लब्धम् आज्यं वृषभात् लब्धेन तण्डुलेन सहपक्वान्नप्रभावेन चक्षुष्पाटवं जायते इति श्रुतिः वदति। अत्र मन्त्रः – "आग्नावैष्णवं घृते चरुं निर्वपेच्चक्षुष्कामः। धेन्वैवा एतद्रेतः। यदाज्यमनडुहस्तण्डुलाः। मिथुनादेवास्मै चक्षुः प्रजनयति"[7] इति। अन्यच्च बीजावापकर्माणि भूमिं खनन्ति। अत्र भूमेः खनने परिमितिः अथवा प्रमाणं किमित्युक्तौ वेदोवदति "चतुरङ्गुलंखेया। चतुरङ्गुलं खनति। चतुरङ्गुलेह्योषधयः प्रतितिष्ठन्ति"[8] इति तैत्तिरीय ब्राह्मणमन्त्रः। दर्शपूर्णमासेष्ट्योः वेदिनिर्माणसन्दर्भे अयं मन्त्रः विनियुक्तो भवति। अत्र भूमेः चतुरङ्गुलमात्रखननमेवसूचयति किमर्थमितिचेत् भूमौ चतुरङ्गुलमात्रे एव ओषधयो भवन्ति। पूर्वमेव भूम्यन्तस्थानाम् ओषधीनां अपनयनानन्तरम् अस्मदपेक्षित धान्यावापनं (आरोपणं) क्रियते। अत एव चतुरङ्गुलमितावेव भूमिः खेया। अद्यत्वे सस्यानां रक्षणाय क्षेत्राणां समार्थ्यायच बहूनि रसायनानि उपयुज्यन्ते। अनेन उपकारः भवति वा नवेति तथातिष्ठतु, उपद्रवस्तावत् अवश्यं जायते। आर्षसम्प्रदाये एतद्भिन्ना कापि पद्धिः दृश्यते। पूर्वं

प्रजापतिः प्रजाः असृजत। तदा क्षेत्राणां सस्योत्पादन शक्तेः क्षीरणत्वात् जनेभ्यः अन्नानि नालभ्यन्त। तदा प्रजापतिः विशिष्टां काञ्चन आर्द्रमृत्तिकां क्षेत्रेषु पातयित्वा सस्योत्पादनाय अपेक्षितं सामर्थ्यं समकल्पयत्। तेन समृद्धान्यन्नानि जातानि। अत्र शक्तिसाधकं द्रव्यं आर्द्रमृत्तिकैव। अस्यैव सूद इति नाम। जलान्तर्देशस्थमृत्तिकायाः सूद इति संज्ञा। तैतिरीयब्राह्मणे एतत्सम्बन्धी कश्चनमन्त्रः प्रवर्तते। "प्रजापतिः प्रजा असृजत। तासामन्नमुपाक्षीयत। तभ्यस्सूदमुपप्राभिनत्। ततोवै तासामन्नं नाक्षीयत। यस्यसूदस्सम्भारोभवति। नास्य गृहेन्नं क्षीयते"[9] इति। अयमर्थः यः यजमानः स्वस्य गृहे गार्हपत्यादिस्थानेषु एतत्सूदाख्यं पदार्थं स्थापयति तस्य अक्षया अन्नसमृद्धिः लभ्यते इति। यदद्य कृषीवलाः सस्यरक्षणाय उपयुञ्जते गोमयादिद्रव्यं तत्सर्वं वेदेनैव सूचितम्। तैतिरीय संहितायां षष्ठकाण्डे इदं ज्ञायते। "यथावै लाङ्गलेनोर्वरां…….. मत्यमन्ववास्यति शान्त्यै"[10] इति। सस्यानां योग्ये क्षेत्रे मत्यसंज्ञकं द्रव्यं यदि विकिरेत् तर्हि फलं सुष्टूत्पद्यते। मत्यशब्दस्य विद्यारण्यस्वामिपादाः एवमर्थमूचुः – "शक्त्याधानसाधनं गोमयादि द्रव्यं मत्यमिति"। एवं रूपेण वेदः सर्वेषु रंगेषु विश्वस्य सर्वतो मुखाभिवृध्यै सुपथनिर्देशकः भवतीत्यत्र नास्ति संशयलेशोपि। पुनरत्र एका शंका जायते। वेदेन अलौकिकोपाय एव खलु बोध्यते ? किम् उक्ताः उपायाः सर्वेऽपि लौकिका इव भान्ति इति। अत्रेदं समाधानम् - वेदः अलौकिकमुपायमपि बोधयति। अलौकिकोपायसाधने एव लौकिकोपायाः अपि सिध्यन्ति। यद्यपि वेदः अलौकिकोपायबोधनपरः तथापि "सर्वं वेदात्प्रसिध्यति"[11] इत्युक्तत्वात् लौकिकोपायाः अपि उपदिश्यन्ते। अतः एतेऽपि वेदादेव प्रसिध्यन्ति इत्यत्र विरोध प्रसिक्तिर्नास्ति ॥

एवं प्राणिनां उज्जीवनाय अपेक्षितं विज्ञानं वेदादेव सिध्यतीति सोदाहरणं निरूपितम्।

।।इतिशम्।।

**अन्त्यटिप्पणी**

1. वे.भा.भू.संग्रहः
2. वा.पु – 1-57
3. जै.सू. 2.1.36
4. अ.वे – 4-15-14
5. अ.वे - 4-6-1
6. अ.वे – 2.8.4
7. तै.सं- 2-2-9
8. तै.ब्रा- 3.2.9
9. तै.ब्रा- 1-2-15)
10. तै.सं- 6-6-8
11. म.स्मृ - **12-97**

**परिशीलितग्रन्थसूची**


1. वेदभाष्यभूमिकासंग्रहः
2. जैमिनिसूत्राणि
3. तैत्तिरीयसंहिता
4. तैत्तिरीयब्राह्मणम्
5. अथर्ववेदसंहिता
6. मनुस्मृतिः
7. वायुपुराणम्